# Lesson B # 7

## सप्तमः पाठः saptamaḥ pāṭhaḥ

*Rāmulu Gajavaāḍa Saṁskṛtam Teacher*

**सत्पुरुषानां (महात्मनाम्) जीवननं यत्पर्यन्तं तत्पर्यन्तं त्यागम्। सत्पुरुषानां जीवनं लोकहिताय एव।**
**satpuruṣānāṁ (mahātmanām) jīvananaṁ yatparyantaṁ tatparyantaṁ tyāgam|**
**satpuruṣānāṁ jīvanaṁ lokahitāya eva|**
**Life of great men is a sacrifice (for others) as long as it is.**

**<u>तृतीया विभक्तिः tṛtīyā vibhaktiḥ = Third declension (by, with and through)</u>**

| | | | |
|---|---|---|---|
| (अध्यापक अ-कारान्तः पु) | अध्यापकेन | अध्यापाभ्याम् | अध्यापकैः |
| (adhyāpaka a-kārāntah pu) | adhyāpakena | adhyāpābhyām | adhyāpakaiḥ |
| (कवि इ-कारान्तः पु) | कविना | कविभ्याम | कविभिः |
| (kavi i-kārāntaḥ pu) | kavinā | kavibhyām | kavibhiḥ |
| (गुरु उ-कारान्तः पु) | गुरुना | गुरुभ्याम् | गुरुभिः |
| (guru u-kārāntaḥ pu) | gurunā | gurubhyām | gurubhiḥ |
| (भ्रातृ ऋ-कारान्तः पु) | भ्रात्रा | भ्रातृभ्याम् | भ्रातृभिः |
| (bhrātṛ ṛ-kārāntaḥ pu) | bhrātrā | bhrātṛbhyām | bhrātṛbhiḥ |
| (रमा आ-कारान्तः स्त्री) | रमया | रमाभ्याम् | रमाभिः |
| (ramā ā-kārāntaḥ strī) | ramayā | ramābhyām | ramābhiḥ |
| (गङ्गा आ-कारान्तः स्त्री) | गङ्गया | गङ्गाभ्याम् | गङ्गाभिः |
| (gaṅgā ā-kārāntaḥ strī) | gaṅgayā | gaṅgābhyām | gaṅgābhiḥ |
| (देवी ई-कारान्तः स्त्री) | देव्या | देवीभ्याम् | देवीभिः |
| (devī ī-kārāntaḥ strī) | devyā | devībhyām | devībhiḥ |
| (मातृ ऋ-कारान्तः स्त्री) | मात्रा | मातृभ्याम् | मातृभिः |
| (mātṛ ṛ-kārāntaḥ strī) | mātrā | mātṛbhyām | mātṛbhiḥ |
| (राजन् न-काराान्तः पु) | राज्ञा | राजभ्याम् | राजभिः |
| (rājan na-kārāntaḥ pu) | rājñā | rājabhyām | rājabhiḥ |

**उदाहरणानि udāharaṇāni = Examples**

छात्रः अध्यापकेन सह गायति । chātraḥ adhyāpakena saha gāyati ।

A student sings along with a teacher.

छात्रः अध्यापकेन सह पठति । chātraḥ adhyāpakena saha paṭhati ।

**A student reads along with a teacher.**

छात्रः हस्तेन लिखति । chātraḥ hastena likhati ।

A student writes with the hand.

छात्रः कन्दुकेन क्रीडति । chātraḥ kandukena krīḍati ।

**A student plays with a ball.**

छात्रौ कन्दुकाभ्यां क्रीडतः । chātrau kandukābhyāṁ krīḍataḥ ।

**Two students play with two balls.**

छात्राः कन्दुकैः क्रीडन्ति । chātrāḥ kandukaiḥ krīḍanti ।

Students (*pl*) play with the balls (*pl*).

एषः पुरुषः अग्निना पचति । eṣaḥ puruṣaḥ agninā pacati ।

This person cooks with fire.

एतौ पुरुषौ अग्निभ्यां पचतः । etau puruṣau agnibhyāṁ pacataḥ ।

**These two men cook with two fires.**

एते पुरुषाः अग्निभिः पचन्ति । ete puruṣāḥ agnibhiḥ pacanti ।

**These men (*pl*) cook with fires (*pl*)).**

जनः औषधं मधुना सह स्वीकरोति । janaḥ auṣadhaṁ madhunā saha svīkaroti ।

**A person takes medicine with honey.**

जनाः औषधानि मधुना सह स्वीकुर्वन्ति । **janāḥ auṣadhāni madhunā saha svīkurvanti ।**

**People take medicine with honey.**

वायुः विना प्राणिनः न जीवन्ति । vāyuḥ vinā prāṇnaḥ na jīvanti ।

Living beings do not live without air.

वायुना विना प्राणिनः न जीवन्ति । vāyunā vinā prāṇinaḥ na jīvanti ।

Living beings do not live without air.

भक्तः मूर्तिं <u>पुष्पमालया</u> अलङ्करोति । bhaktaḥ mūrtiṁ <u>puspamālayā</u> alaṅkaroti |

**A devotee decorates the image <u>with a flower garland</u>.**

भक्तौ मूर्तिं <u>पुष्पमालाभ्यां</u> अलङ्कुरुतः । bhaktau mūrtiṁ <u>puspamālābhyāṁ</u> alaṅkurutaḥ|

**T wo devotees decorate the image <u>with two flower garlands</u>.**

भक्ताः मूर्तिं <u>पुष्पमालाभिः</u> अलङ्कुर्वन्ति । bhaktāḥ mūrtiṁ <u>puspamālābhih</u> alaṅkurvanti |

**Devotees decorates (*pl*) the image <u>with garlands</u> (*pl*).**

छात्रः <u>लेखन्या</u> पाठं लिखति । Chātraḥ <u>lekhanyā</u> pāṭhaṁ likhati|

**Student writes the lesson <u>with a pen</u>.**

छात्रौ लेखनीभ्यां पठं लिखतः । chātrau lekhanībhyāṁ paṭhaṁ likhataḥ|

Two students write the lesson <u>with two pens</u>.

छात्राः लेखनीभिः पाठं लिखन्ति । chātrāḥ <u>lekhanībhih</u> pāṭhaṁ likhanti|

**Students (*pl*) write the lesson <u>with pens</u> (*pl*).**

<u>राज्ञा सह</u> सेवकः गच्छति । <u>rājñā saha</u> sevakaḥ gacchati|

**A servant goes <u>along with the king</u>.**

<u>राजभ्यां सह</u> सेवकौ गच्छतः । <u>rājabhyāṁ saha</u> sevakau gacchataḥ|

**Two servants go <u>along with two kings</u>.**

<u>राजभिः सह</u> सेवकाः गच्छन्ति । <u>rājabhiḥ saha</u> sevakāḥ gacchanti|

**Servants (*pl*)) <u>go along with kings</u> (*pl*).**

## <u>प्रश्नाः praśnāḥ</u> = <u>Questions</u>

अधः आङ्ग्लवाक्यानां अनुवादं संस्कृतभाषायां लिखतु । adhaḥ āṅglavākyānām anuvādaṁ saṁskṛtabhāṣāyāṁ likhatu| = **Translate the following Sanskritam sentences into English.**

1. कृष्णः गोपेन सह वनं गच्छति । kṛṣṇaḥ gopena saha vanaṁ gacchati|
2. कृष्णः गोपाभ्यां सह वनं गच्छति । kṛṣṇaḥ gopābhyāṁ saha vanaṁ gacchati|
3. कृष्णः गोपैः सह वनं गच्छति । kṛṣṇaḥ gopaiḥ saha vanaṁ gacchati|
4. बालः कपिना सह क्रीडति । bālaḥ kapinā saha krīḍati|

5. बालकौ कपिभ्यां सह क्रीडतः। bālakau kapibhyāṁ saha krīḍataḥ।
6. बालकाः कपिभिः क्रीडन्ति। bālakāḥ kapibhiḥ krīḍanti।
7. मम पिता बन्धुना सह खादति। mama pitā bandhunā saha khādati।
8. मम पिता बन्धुभिः सह खादति। mama pitā bandhubhiḥ saha khādati।
9. स्वसा मात्रा सह कार्यं करोति। svasā mātrā saha kāryaṁ karoti।
10. माता छुरिकया फलानि च शाकान् कर्तयति। mātā churikayā phalāni ca śākān kartayati।
11. सिंहः सिंह्या सह धावति। siṁhaḥ siṁhyā saha dhāvati।
12. राज्ञा सह सेना युद्धं करोति। rājñā saha senā yuddhaṁ karoti।

**<u>धातवः dhātavaḥ = Verbal roots</u>**

गाय् gāy (गायति gāyati) = to sing, लिख् likh(लिखति likhati) = to write,क्रीड् krīḍ (क्रीडति krīḍati) = to play, पच् pac (पचति pacati) = to cook, स्वीकृ svīkṛ (स्वीकरोति svīkaroti) = to take, accept,जीव् jīv (जीवति jīvati)= to live, अलङ्कृ alaṅkṛ (अलङ्करोति alaṅkaroti) = to decorate, खाद् khād (खादति khādati) = to eat, कर्तयति kartayati = cuts,

**<u>शब्दसंग्रहः śabdasaṅgrahaḥ = Vocabulary</u>**

अध्यापकः adhyāpakaḥ = teacher, गुरुः guruḥ = Guru, भ्रातृ bhrātṛ = brother, रमा ramā = Ramā, गङ्गा gaṅgā = Gaṅgā (the river), देवी devī = godess divine, मातृ mātṛ = mother, राजन् rājan = king, छात्रः chātraḥ = student, हस्तः hastaḥ = hand, कन्दुकः kandukaḥ = ball, पुरुषः puruṣaḥ = male person, अग्निः agniḥ = fire, जनः janaḥ = person, औषधम् auṣadham = medicine, मधु madhu = honey, वायुः vāyuḥ = air, प्राणी prāṇī = living being, प्राणिनः prāṇinaḥ = living beings, भक्तः bhaktaḥ = devotee, मूर्ति mūrti = image, पुष्पमाला puṣpamālā = garland of flowers, लेखनी lekhanī = pen, पाठः pāṭhaḥ = lesson, सेवकः sevakaḥ = servant, वनम् vanam = forest, कपिः kapiḥ = monkey, छुरिका churikā = knife, सिंहः siṁhaḥ = lion, सिंही siṁhī = lioness, शाकः śākaḥ, शाकम् śākam = vegetable, बन्धुः bandhuḥ = relative,